*With Humble Pranams*

*To*

*Sri U.Ve. Mukkur Lakshmi Narasimhachariyar Swamy*

# Taittirīya-Saṃhitā

## Edited by Vijayaraghavan Bashyam

## Book 1, Chapter 8

कृष्ण यजुर्वेदीया तैत्तिरीय संहिता,

प्रथमं काण्डम्, अष्ठमः प्रपाठकः

राजसूयः

हरिः ॐ

[[1-8-1]]

अनुमतादियोगाः नैर्ऋतमन्त्राश्च॥ विश्वे देवा ऋषयः।

[[1-8-1-1]]

अनुमत्यै पुरोडाशमष्टाकपालं निर्वपति धेनुर्दक्षिणा

ये प्रत्यञ्चः शम्याया अवशीयन्ते तं नैर्ऋतमेककपालं कृष्णं वासः कृष्णतूषं दक्षिणा

वीहि स्वाहाऽऽहुतिं जुषाणः।

एष ते निर्ऋते भागो भूते हविष्मत्यसि मुञ्चेममꣳहसः

स्वाहा नमो य इदं चकार।

आदित्यं चरुं निर्वपति वरो दक्षिणा।

आग्नावैष्णवमेकादशकपालं वामनो वही दक्षिणा।

अग्नीषोमीयम्॥

[[1-8-1-2]]

एकादशकपालꣳ हिरण्यं दक्षिणा।

ऐन्द्रमेकादशकपालमृषभो वही दक्षिणा।

आग्नेयमष्टाकपालमैन्द्रं दध्यृषभो वही दक्षिणा।

ऐन्द्राग्नं द्वादशकपालं वैश्वदेवं चरुं प्रथमजो वत्सो दक्षिणा सौम्यꣳ श्यामाकं चरुं वासो दक्षिणा

सरस्वत्यै चरुꣳ सरस्वते चरुं मिथुनौ गावौ दक्षिणा॥

[[1-8-2]]

चातुर्मास्येषु प्रथमं वैश्वदेव पर्व॥ विश्वेदेवा ऋषयः।

[[1-8-2-1]]

आग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं द्वादशकपालꣳ सारस्वतं चरुं पौष्णं चरुं मारुतꣳ सप्तकपालं

वैश्वदेवीमामिक्षाँ द्यावापृथिव्यमेककपालम्॥

[[1-8-3]]

द्वितीयम् वरुण प्रधास पर्व॥ विश्वेदेवा ऋषयः

[[1-8-3-1]]

ऐन्द्राग्नमेकादशकपालं मारुतीमामिक्षाँ वारुणीमामिक्षाँ कायमेककपालं

प्रघास्यान् हवामहे मरुतो यज्ञवाहसः करम्भेण सजोषसः।

मो षू ण इन्द्र पृत्सु देवास्तु स्म ते शुष्मिन्नवया।

मही ह्यस्य मीढुषो यव्या। हविष्मतो मरुतो वन्दते गीः।

यद्ग्रामे यदरण्ये यत् सभायां यदिन्द्रिये। यच्छूद्रे यदर्य एनश्चकृमा वयम्।

यदेकस्याधि धर्मणि तस्यावयजनमसि स्वाहाँ।

अक्रन् कर्म कर्मकृतः सह वाचा मयोभुवा।

देवेभ्यः कर्म कृत्वाऽस्तं प्रेत सुदानवः॥

[[1-8-4]]

तृतीयं साकमेधपर्व॥ विश्वेदेवा ऋषयः।

[[1-8-4-1]]

अग्नये ऽनीकवते पुरोडाशमष्टाकपालं निर्वपति साकꣳ सूर्येणोद्यता मरुद्भ्यः सांतपनेभ्यो मध्यन्दिने चरुं मरुद्भ्यो

गृहमेधिभ्यः सर्वासां दुग्धे सायं चरुम्

पूर्णा दर्वि परा पत सुपूर्णा पुनरा पत।

वस्नेव वि क्रीणावहा इषमूर्जꣳ शतक्रतो॥

देहि मे ददामि ते नि मे धेहि नि ते दधे।

निहारमिन्नि मे हरा निहारम्॥

[[1-8-4-2]]

नि हरामि ते॥

मरुद्भ्यः क्रीडिभ्यः पुरोडाशꣳ सप्तकपालं निर्वपति साकꣳ सूर्येणोद्यताऽऽग्नेयमष्टाकपालं निर्वपति सौम्यं चरुꣳ सावित्रं

द्वादशकपालꣳ सारस्वतं चरुं पौष्णं चरुमैन्द्राग्नमेकादशकपालमैन्द्रं चरुं वैश्वकर्मणमेककपालम्॥

[[1-8-5]]

महापितृ यज्ञः॥ विश्वेदेवा ऋषयः।

[[1-8-5-1]]

सोमा॑य पि॒तृम॑ते पुरो॒डाश॒ꣳ॒ षट्क॑पालं॒ निर्व॑पति पि॒तृभ्यो॑ ब॒र्हि॒षद्भ्यो॑ धा॒नाः पि॒तृभ्यो॑ऽग्निष्वा॒त्तेभ्यो॑ऽभिवा॒न्या॑यै दु॒ग्धे म॒न्थम्

ए॒तत् ते॑ तत॒ ये च॒ त्वामन्वे॒तत् ते॑ पितामह प्रपितामह॒ ये च॒ त्वामन्वत्र॑ पितरो यथाभा॒गं म॑न्दध्वꣳ॥

सु॒सं॒दृशं॑ त्वा व॒यम् मघ॑वन् मन्दिषी॒महि॑। प्र नू॒नम् पू॒र्णव॑न्धुरः स्तु॒तो या॑सि॒ वशा॒ꣳ॒ अनु॑। योजा॒ न्विन्द्र ते॒ हरी॑॥
[[1-8-5-2]]
अक्ष॒न्नमी॑मदन्त॒ ह्यव॑ प्रि॒या अ॑धूषत। अस्तो॑षत॒ स्वभा॑नवो॒ विप्रा॒ नवि॑ष्ठया म॒ती। योजा॒ न्विन्द्र॒ ते॒ हरी॑॥

अक्ष॑न् पि॒तरो॒ऽमी॑मदन्त पि॒तरो॒ऽती॑तृपन्त पि॒तरो॒ऽमी॑मृजन्त पि॒तर॑ः।

परे॑त पितरः सोम्या गम्भी॒रैः प॒थिभि॑ः पू॒र्व्यैः।

अथा॑ पि॒तॄन्त्सु॑वि॒दत्रा॒ꣳ॒ अपी॑त य॒मेन॒ ये स॑ध॒माद॒ं मद॑न्ति॥

मनो॒ न्वा हु॑वामहे नाराश॒ꣳ॒सेन॒ स्तोमे॑न पि॒तृणां॒ च॒ मन्म॑भिः।

आ॥
[[1-8-5-3]]
न॒ ए॒तु मन॒ः पुन॒ः क्रत्वे॒ दक्षा॑य जी॒वसे॑। ज्योक्च॒ सूर्यं॑ दृ॒शे॥

पुन॑र्नः पि॒तरो॒ मनो॒ दद॑ातु॒ दैव्यो॒ जन॑ः। जी॒वं व्रात॒ꣳ॒ सचेमहि॒॥

यद॒न्तरि॑क्षं पृ॒थि॒वीमु॒त द्यां यन्मा॒तर॑ं पि॒तर॑ं वा जिहि॒ꣳ॒सि॒म।

अ॒ग्निर्मा॒ तस्मा॒देन॑सो॒ गार्ह॑पत्य॒ः प्र मु॑ञ्चतु दु॒रि॒ता यानि॑ चकृ॒म क॒रोतु॒ माम॑ने॒नस॑म्॥
[[1-8-6]]
त्र्यंबक पुरोडाशाः॥ विश्वेदेवा ऋषयः।
[[1-8-6-1]]
प्र॒तिपू॒रु॒षमेक॑कपाला॒न्निर्व॑प॒त्येक॒मति॑रिक्त॒म्।

याव॑न्तो गृ॒ह्याः॑ स्मस्तेभ्य॒ः कर्म॑करम्

प॒शू॒ना॒ꣳ॒ शर्मा॑सि॒ शर्म॒ यज॑मानस्य॒ शर्म॑ मे य॒च्छ।

एक॑ ए॒व रु॒द्रो न द्वि॒तीया॑य तस्थे।

आ॒खुस्ते॑ रुद्र प॒शुस्तं जु॑षस्व।

ए॒ष ते॑ रुद्र भा॒गः स॒ह स्वस्राऽम्बि॑कया॒ तं जु॑षस्व

भे॒षजं गवे॒ऽश्वा॑य॒ पुरु॑षाय भे॒षजमथो॑ अ॒स्मभ्यं॑ भे॒षज॒ꣳ॒ सुभे॑षज॒म्॥
[[1-8-6-2]]
यथाऽस॑ति।

सु॒गं मे॑षाय॑ मे॒ष्यै (मे॒ष्या॑)

अवा॑म्ब रु॒द्रम॑दिम॒ह्यव॑ दे॒वं त्र्य॑म्बकम्।

यथा॑ न॒ः श्रेय॑स॒ः कर॒द्यथा॑ नो॒ वस्य॑स॒ः कर॒द्यथा॑ नः पशु॒मत॒ः कर॒द्यथा॑ नो व्यवसा॒यया॑त्॥

त्र्य॑म्बकं यजामहे सु॒ग॒न्धिं पु॑ष्टि॒वर्ध॑नम्।

उ॒र्वा॒रु॒कमि॑व॒ बन्ध॑नान्मृ॒त्योर्मु॑क्षीय॒ माऽमृता॑त्।

ए॒ष ते॑ रुद्र भा॒गस्तं जु॑षस्व॒ तेना॑व॒सेन॑ प॒रो मूज॑व॒तो ऽती॒हि।

अव॑ततधन्वा॒ पिना॑कहस्त॒ः कृत्ति॑वासाः॥

[[1-8-7]]

शुनासीर्यम् इन्द्रतुरीयम् पञ्चध्मीयमन्त्राः अपामार्गहोममन्त्राश्च॥ विश्वेदेवा ऋषयः।

[[1-8-7-1]]

ऐ॒न्द्रा॒ग्नं द्वाद॑शकपालं वैश्वदे॒वं च॒रुमिन्द्रा॑य॒ शु॒ना॒सीरा॑य पुरो॒डाशं॒ द्वाद॑शकपालं वाय॒व्यं॑ पय॑ः सौ॒र्यमेक॑कपालं

द्वादशग॒वꣳ सीरं॒ दक्षि॑णा।

आ॒ग्ने॒यम॒ष्टाक॑पालं॒ निर्व॑पति रौ॒द्रं गा॑वीधु॒कं च॒रुमै॒न्द्रं दधि॑ वा॒रु॒णं य॑व॒मयं॑ च॒रुं व॒हिनी॑ धे॒नुर्दक्षि॑णा॒

ये दे॒वाः पु॑र॒ःसदो॒ ऽग्निने॑त्रा दक्षिण॒सदो॑ य॒मने॑त्राः पश्चा॒त्सद॑ः सवि॒तृने॑त्रा उत्तर॒सदो॒ वरु॑णनेत्रा उपरि॒षदो॒ बृह॒स्पति॑नेत्रा

रक्षो॒ह॒णस्ते न॑ः पान्तु॒ ते नो॑ ऽवन्तु॒ तेभ्य॑ः॥

[[1-8-7-2]]

नम॒स्तेभ्य॑ः स्वाहा॒

समू॑ढ॒ꣳ॒ रक्ष॒ः संद॑ग्ध॒ꣳ॒ रक्ष॑ इ॒दम॒हꣳ रक्षो॒ ऽभि सं द॑हामि।

अ॒ग्नये॑ रक्षो॒घ्ने स्वाहा॑ य॒माय॑ सवि॒त्रे वरु॑णाय॒ बृह॒स्पत॑ये॒ दुव॑स्वते रक्षो॒ घ्ने स्वाहा॑

प्रष्टिवा॒ही रथो॒ दक्षि॑णा

दे॒वस्य॑ त्वा सवि॒तुः प्र॑स॒वे॑ ऽश्विनो॑र्बा॒हुभ्या॑ꣳ पू॒ष्णो हस्ता॑भ्या॒ꣳ॒ रक्ष॑सो व॒धं जु॑होमि ह॒तꣳ रक्षो॒ ऽव॑धिष्म॒ रक्ष॑ः।

यद्वस्ते॒ तद्दक्षि॑णा॥

[[1-8-8]]

देविकादि कर्म षट्कम्॥ विश्वेदेवा ऋषयः

[[1-8-8-1]]

धा॒त्रे पु॑रो॒डाशं॒ द्वाद॑शकपालं॒ निर्व॑पति।

अनु॑मत्यै च॒रुꣳ।

रा॒काये॑ च॒रुꣳ।

सि॑नीवा॒ल्यै च॒रुम्।

कु॒ह्वै॑ च॒रुम्

मि॑थु॒नौ गावौ॒ दक्षि॑णा।

आ॒ग्ना॒वै॒ष्ण॒वमेका॑दशकपालं॒ निर्व॑पति।

ऐन्द्रावैष्ण॒वमेका॑दशकपालम्।

वैष्ण॒वं त्रि॑कपा॒लम्।

वा॑म॒नो व॒ही दक्षि॑णा।

अ॒ग्नी॒षो॒मी॒य॒मेका॑दशकपालं॒ निर्व॑पति।

इन्द्रासो॒मीय॒मेका॑दशकपालꣳ।

सौ॒म्यं च॒रुम्

ब॒भ्रुर्दक्षि॑णा

सोमापौ॒ष्णं च॒रुं निर्व॑पति।

ऐन्द्रापौ॒ष्णं च॒रुम्

पौ॒ष्णं च॒रुꣳ॒।

श्या॒मो दक्षि॑णा

वैश्वा॒न॒रं द्वाद॑शकपालं॒ निर्व॑पति॒

हिर॑ण्यं॒ दक्षि॑णा

वा॒रु॒णं य॑व॒मयं॑ च॒रुम्

अश्वो॒ दक्षि॑णा॥

[[1-8-9]]

रत्निनाम् हवीꣳषि, अभिषेचनीयस्य दीक्षिणीया च॥ विश्वेदेवा ऋषयः

[[1-8-9-1]]

बा॒र्ह॒स्प॒त्यं च॒रुं निर्व॑पति ब्र॒ह्मणो॑ गृ॒हे शि॑तिपृ॒ष्ठो दक्षि॑णा।

ऐ॒न्द्रमेका॑दशकपालꣳ राज॒न्य॑स्य गृ॒ह ऋ॑ष॒भो दक्षि॑णा।

आ॒दि॒त्यं च॒रुं महि॑ष्यै गृ॒हे धे॒नुर्दक्षि॑णा

नै॒र्ऋ॒तं च॒रुं परि॑वृक्त्यै गृ॒हे कृ॒ष्णानां᳚ व्री॒ही॒णां न॒खनि॑र्भिन्नं कृ॒ष्णा कू॒टा दक्षि॑णा।

आ॒ग्ने॒यम॒ष्टाक॑पालꣳ सेना॒न्यो॑ गृ॒हे हिर॑ण्यं॒ दक्षि॑णा

वा॒रु॒णं दश॑कपालꣳ सू॒तस्य॑ गृ॒हे म॒हानि॑रष्टो॒ दक्षि॑णा

मा॒रु॒तꣳ स॒प्तक॑पालं ग्राम॒ण्यो॑ गृ॒हे पृश्नि॒र्दक्षि॑णा

सा॒वि॒त्रं द्वाद॑शकपालम्॥

[[1-8-9-2]]

क्ष॒त्तुर्गृ॒ह उ॑पध्व॒स्तो दक्षि॑णा।

आ॒श्वि॒नं द्वि॑कपा॒लꣳ सं॑ग्रही॒तुर्गृ॒हे स॑वा॒त्यौ॑ दक्षि॑णा

पौष्णं चरुं भागदुघस्य गृहे श्यामो दक्षिणा

रौद्रं गावीधुकं चरुमक्षावापस्य गृहे शबल उद्वारो दक्षिणा।

इन्द्राय सुत्राम्णे पुरोडाशमेकादशकपालं प्रति निर्वपतीन्द्रायाꣳहोमुचे ऽयं नो राजा वृत्रहा राजा भूत्वा वृत्रं वध्यात्।

मैत्राबार्हस्पत्यं भवति श्वेतायै श्वेतवत्सायै दुग्धे स्वयंमूर्ते स्वयंमथित आज्य आश्वत्थे॥

[[1-8-9-3]]

पात्रे चतुःस्रक्तौ स्वयमवपन्नायै शाखायै

कर्णाꣳश्चाकर्णाꣳश्च तण्डुलान्वि चिनुयाद्ये कर्णाः स पयसि बार्हस्पत्यो ये ऽकर्णाः स आज्ये मैत्रः

स्वयङ्कृता वेदिर्भवति स्वयंदिनं बर्हिः स्वयंकृत इध्मः

सैव श्वेता श्वेतवत्सा दक्षिणा॥

[[1-8-3]]

देवसुवाम् हवींष्षि॥ विश्वेदेवा ऋषयः

[[1-8-10-1]]

अग्नये गृहपतये पुरोडाशमष्टाकपालं निर्वपति कृष्णानां व्रीहीणाꣳ सोमाय वनस्पतये श्यामाकं चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशं द्वादशकपालमाशूनां व्रीहीणाꣳ रुद्राय पशुपतये गावीधुकं चरुं बृहस्पतये वाचस्पतये नैवारं चरुमिन्द्राय ज्येष्ठाय पुरोडाशमेकादशकपालं महाव्रीहीणां मित्राय सत्यायाऽऽम्बानां चरुं वरुणाय धर्मपतये यवमयं चरुꣳ।

सविता त्वां प्रसवानाꣳ सुवतामग्निर्गृहपतीनाꣳ सोमो वनस्पतीनाꣳ रुद्रः पशूनाम्॥

[[1-8-10-2]]

बृहस्पतिर्वाचामिन्द्रो ज्येष्ठानां मित्रः सत्यानां वरुणो धर्मपतीनाम्।

ये देवा देवसुवः स्थ त इममामुष्यायणमनमित्राय सुवध्वं महते क्षत्राय महत आधिपत्याय महते जानराज्याय।

एष वो भरता राजा सोमो ऽस्माकं ब्राह्मणानाꣳ राजा

प्रति त्यन्नाम राज्यमधायि स्वां तनुवं वरुणो अशिश्रेच्छुचेर्मित्रस्य व्रत्या अभूमामन्महि महत ऋतस्य नाम

सर्वे व्राता वरुणस्याभूवन्वि मित्र एवैररातिमतारीदसूषुदन्त यज्ञिया ऋतेन व्यु त्रितो जरिमाणं न आनड्

विष्णोः क्रमो ऽसि विष्णोः क्रान्तमसि विष्णोर्विक्रान्तमसि

[[1-8-11]]

अभिषेकजल ग्रहणम्॥ विश्वेदेवा ऋषयः

[[1-8-11-1]]

अर्थेतः स्थापां पतिरसि वृषाऽस्यूर्मिर्वृषसेनो ऽसि व्रजक्षितः स्थ मरुतामोजः स्थ सूर्यवर्चसः स्थ सूर्यत्वचसः स्थ मान्दाः स्थ वाशाः स्थ शक्करीः स्थ विश्वभृतः स्थ जनभृतः स्थाग्नेस्तेजस्याः स्थापामोषधीनाꣳ रसः स्थ।

अपो देवीर्मधुमतीरगृह्णन्नूर्जस्वती राजसूयाय चितानाः।

याभिर्मित्रावरुणावभ्यषिञ्चन् याभिरिन्द्रमनयन्नत्यरातीः॥

राष्ट्रदाः स्थ राष्ट्रं दत्त स्वाहा राष्ट्रदाः स्थ राष्ट्रममुष्मै दत्त॥
[[1-8-12]]

अभिषेकजल संस्कारः॥ विश्वेदेवा ऋषयः
[[1-8-12-1]]

देवीरापः सं मधुमतीर्मधुमतीभिः सृज्यध्वं महि वर्चः क्षत्रियाय वन्वानाः।

अनाधृष्टाः सीदतोर्जस्वतीर्महि वर्चः क्षत्रियाय दधतीः।

अनिभृष्टमसि वाचो बन्धुस्तपोजाः सोमस्य दात्रमसि

शुक्रा वः शुक्रेणोत्पुनामि चन्द्राश्चन्द्रेणामृता अमृतेन स्वाहा राजसूयाय चितानाः

सधमादो द्युम्निनीरूर्ज एता अनिभृष्टा अपस्युवो वसानः।

पस्त्यासु चक्रे वरुणः सधस्थमपाꣳ शिशुः॥
[[1-8-12-2]]

मातृतमास्वन्तः॥

क्षत्रस्योल्बमसि क्षत्रस्य योनिरसि।

आविन्नो अग्निर्गृहपतिराविन्न इन्द्रो वृद्धश्रवा आविन्नः पूषा विश्ववेदा आविन्नौ मित्रावरुणवृतावृधावाविन्ने द्यावापृथिवी

धृतव्रते आविन्ना देव्यदितिर्विश्वरूप्याविन्नोऽयमसावामुष्यायणोऽस्यां विश्यस्मिन् राष्ट्रे महते क्षत्राय महत

आधिपत्याय महते जानराज्याय।

एष वो भरता राजा सोमो ऽस्माकं ब्राह्मणानाꣳ राजा।

इन्द्रस्य॥
[[1-8-12-3]]

वज्रो ऽसि वार्त्रघ्नस्त्वयाऽयं वृत्रं वध्यात्।

शत्रुबाधनाः स्थ

पात मा प्रत्यञ्चं पात मा तिर्यञ्चमन्वञ्चं मा पात दिग्भ्यो मा पात विश्वाभ्यो मा नाष्ट्राभ्यः पात

हिरण्यवर्णावुषसां विरोके ऽयःस्थूणावुदितौ सूर्यस्याऽऽ रोहतं वरुण मित्र गर्तं ततश्चक्षाथामदितिं दितिं च॥
[[1-8-13]]

दिग्व्यास्थापनम्॥ विश्वेदेवा ऋषयः
[[1-8-13-1]]

समिधमा तिष्ठ गायत्री त्वा छन्दसामवतु त्रिवृत्स्तोमो रथन्तरꣳ सामाग्निर्देवता ब्रह्म द्रविणम्

उग्रामा तिष्ठ त्रिष्टुप् त्वा छन्दसामवतु पञ्चदशः स्तोमो बृहत् सामेन्द्रो देवता क्षत्रं द्रविणम्।

विराजमा तिष्ठ जगती त्वा छन्दसामवतु सप्तदशः स्तोमो वैरूपꣳ साम मरुतो देवता विड्द्रविणम्

उदीचीमा तिष्ठानुष्टुप् त्वा॥
[[1-8-13-2]]

छन्दसामवत्वेक विꣳशः स्तोमो वैराजꣳ साम मित्रावरुणौ देवता बलं द्रविणम्

ऊर्ध्वामा तिष्ठ पङ्क्तिस्त्वा छन्दसामवतु त्रिणवत्रयस्त्रिꣳशौ स्तोमौ शाक्वररैवते सामनी बृहस्पतिर्देवता वर्चो द्रविणम्

ईदृङ्चान्यादृङ्चैतादृङ्च प्रतिदृङ्च मितश्च संमितश्च सभराः

शुक्रज्योतिश् च चित्रज्योतिश्च सत्यज्योतिश्च ज्योतिष्माꣳश्च सत्यश्चर्तपाश्च॥
[[1-8-13-3]]

अत्यꣳहाः।

अग्नये स्वाहा सोमाय स्वाहा सवित्रे स्वाहा सरस्वत्यै स्वाहा पूष्णे स्वाहा बृहस्पतये स्वाहेन्द्राय स्वाहा घोषाय स्वाहा श्लोकाय स्वाहाऽꣳशाय स्वाहा भगाय स्वाहा क्षेत्रस्य पतये स्वाहा

पृथिव्यै स्वाहाऽन्तरिक्षाय स्वाहा दिवे स्वाहा सूर्याय स्वाहा चन्द्रमसे स्वाहा नक्षत्रेभ्यः स्वाहाऽद्भ्यः स्वाहौषधीभ्यः स्वाहा वनस्पतिभ्यः स्वाहा चराचरेभ्यः स्वाहा परिप्लवेभ्यः स्वाहा सरीसृपेभ्यः स्वाहा
[[1-8-14]]

अभिषेकः॥ विश्वेदेवा ऋषयः
[[1-8-14-1]]

सोमस्य त्विषिरसि तवेव मे त्विषिर्भूयात्।

अमृतमसि मृत्योर्मा पाहि

दिद्योन्मा पाहि।

अवेष्टा दन्दशूकाः।

निरस्तं नमुचेः शिरः

सोमो राजा वरुणो देवा धर्मसुवश्च ये। ते ते वाचꣳ सुवन्तां ते ते प्राणꣳ सुवन्तां ते ते चक्षुः सुवन्तां ते ते श्रोत्रꣳ सुवन्ताꣳ।

सोमस्य त्वा द्युम्नेनाभि षिञ्चाम्यग्नेः॥
[[1-8-14-2]]

तेजसा सूर्यस्य वर्चसेन्द्रस्येन्द्रियेण मित्रावरुणयोर्वीर्येण मरुतामोजसा

क्षत्राणां क्षत्रपतिरसि।

अति दिवस्पाहि

समाववृत्रन्नधरागुदीचीरहिं बुध्नियमनु संचरन्तीः ताः पर्वतस्य वृषभस्य पृष्ठे नावश्चरन्ति स्वसिच इयानाः॥

रुद्र यत्ते क्रयी परं नाम तस्मै हुतमसि यमेष्टमसि॥

प्रजापते न त्वदेतान्यन्यो विश्वा जातानि परि ता बभूव।

यत्का॑मास्ते जुहु॒मस्तन्नो॑ अस्तु व॒यꣳ स्या॑म॒ पत॑यो रयी॒णाम्॥
[[1-8-15]]

रथेन दिग्विजयः॥ विश्वेदेवा ऋषयः
[[1-8-15-1]]

इन्द्र॑स्य॒ वज्रो॑ ऽसि॒ वार्त्रघ्न॒स्त्वया॒ऽयं वृ॒त्रं व॑ध्यात्।

मि॒त्रावर॑रुणयोस्त्वा प्रशा॒स्त्रोः प्र॒शिषा॑ युनज्मि य॒ज्ञस्य॒ योगे॑न

विष्णोः॒ क्रमो॑ ऽसि॒ विष्णोः॑ क्रा॒न्तम॑सि॒ विष्णो॒र्विक्रा॑न्तमसि

म॒रुतां॑ प्रस॒वे जे॑षम्

आ॒प्तं मनः॒

सम॒हमि॑न्द्रि॒येण॑ वी॒र्ये॑ण

पशू॒नां म॒न्युर॑सि॒ तवे॑व मे म॒न्युर्भू॑या॒त्।

नमो॑ मा॒त्रे पृ॑थि॒व्यै माऽहं मा॒तरं॑ पृथि॒वीꣳ हिꣳसिषं॒ मा॥
[[1-8-15-2]]

मां मा॒ता पृ॑थि॒वी हिꣳसी॒त्।

इय॑द॒स्यायु॑र॒स्यायु॑र्मे॒ धे॒ह्यू॒र्गस्यू॒र्जं॑ मे धेहि॒ यु॒ङ्ङसि॒ वर्चो॑ ऽसि॒ वर्चो॒ मयि॑ धेहि।

अ॒ग्नये॑ गृ॒ह प॑तये॒ स्वाहा॒ सोमा॑य॒ व॒नस्पत॑ये॒ स्वाहेन्द्र॑स्य॒ बला॑य॒ स्वाहा॑ म॒रुता॒मोज॑से॒ स्वाहा॑

ह॒ꣳसः शु॑चि॒षद्व॑सु॒रन्तरि॑क्ष॒सद्धोता॑ वेदि॒षदति॑थिर्दुरोण॒सत्।

नृ॒षद्व॑र॒सदृ॑त॒सद्व्यो॑म॒सद॒ब्जा गो॒जा ऋ॑त॒जा अ॑द्रि॒जा ऋ॒तं बृ॒हत्॥
[[1-8-16]]

जितवतो राज्ञः सेवोपचारः॥ विश्वेदेवा ऋषयः
[[1-8-16-1]]

मि॒त्रो॑ ऽसि॒ वरु॑णो ऽसि॒

सम॒हं विश्वै॑र्दे॒वैः

क्ष॒त्रस्य॒ नाभि॑रसि क्ष॒त्रस्य॒ योनि॑रसि

स्यो॒नामा सीद॑ सुष॒दा॒मा सीद॒

मा त्वा॑ हिꣳसी॒न्मा मा॑ हिꣳसी॒त्।

नि ष॑साद धृ॒तव्र॑तो॒ वरु॑णः प॒स्त्या॑स्वा साम्रा॑ज्याय सु॒क्रतुः॑।

ब्रह्मा३न्त्वꣳ रा॑जन् ब्र॒ह्माऽसि॑ सवि॒ताऽसि॑ स॒त्यस॑वो॒ ब्रह्मा३न्त्वꣳ रा॑जन् ब्र॒ह्माऽसीन्द्रो॑ ऽसि स॒त्यौजाः॑॥
[[1-8-16-2]]

ब्रह्मा३न्त्वꣳ रा॑जन् ब्र॒ह्माऽसि॑ मि॒त्रो॑ ऽसि सु॒शेवो॒ ब्रह्मा३न्त्वꣳ रा॑जन् ब्र॒ह्मऽआसि॒ वरु॑णो ऽसि स॒त्यध॒र्मा॑।

इन्द्रस्य वज्रो ऽसि वार्त्रघ्नस्तेन मे रध्य

दिशो ऽभ्ययꣳ राजाऽभूत्

सुश्लोका३ꣳ सुमङ्गला३ꣳ सत्यराजा३न्

अपां नप्त्रे स्वाहोर्जो नप्त्रे स्वाहाऽग्नये गृहपतये स्वाहा॥
[[1-8-17]]

संसृपां हवीꣳषि॥ विश्वेदेवा ऋषयः
[[1-8-17-1]]

आग्नेयमष्टाकपालं निर्वपति

हिरण्यं दक्षिणा सारस्वतं चरुं वत्सतरी दक्षिणा सावित्रं द्वादशकपालमुपध्वस्तो दक्षिणा पौष्णं चरुꣳ श्यामो दक्षिणा बार्हस्पत्यं चरुꣳ शितिपृष्ठो दक्षिणैन्द्रमेकादशकपालमृषभो दक्षिणा वारुणं दशकपालं महानिरष्टो दक्षिणा सौम्यं चरुं बभ्रुर्दक्षिणा त्वाष्ट्रमष्टाकपालꣳ शुण्ठो दक्षिणा वैष्णवं त्रिकपालं वामनो दक्षिणा॥
[[1-8-18]]

दशपेयः॥ विश्वेदेवा ऋषयः
[[1-8-18-1]]

सद्यो दीक्षयन्ति

सद्यः सोमं क्रीणन्ति

पुण्डरिस्रजांप्र यच्छति

दशभिर्वत्सतरैः सोमं क्रीणाति

दशपेयो भवति

शतं ब्राह्मणाः पिबन्ति

सप्तदशꣳ स्तोत्रं भवति

प्राकाशावध्वर्यवे ददाति

स्रजमुद्गात्रे

रुक्मꣳ होत्रे।

अश्वं प्रस्तोतृप्रतिहर्तृभ्याम्।

द्वादश पष्ठौहीर्ब्रह्मणे

वशां मैत्रावरुणाय।

ऋषभं ब्राह्मणाच्छꣳसिने

वाससी नेष्टापोतृभ्याꣳ।

स्थूरिं यवाचितमच्छावाकाय।

अनड्वाहमग्नीधे

भार्गवो होता भवति

श्रायन्तीयं ब्रह्मसामं भवति

वारवन्तीयमग्निष्टोमसामꣳ।

सारस्वतीरपो गृह्णाति॥

[[1-8-19]]

दिशामवेष्टयः, पशुद्वयबन्धः,सात्यदुतानां हवीꣳषि च॥ विश्वेदेवा ऋषयः।

[[1-8-19-1]]

आग्नेयमष्टाकपालं निर्वपति हिरण्यं दक्षिणा।

ऐन्द्रमेकादशकपालमृषभो दक्षिणा

वैश्वदेवं चरुं पिशङ्गी पष्ठौही दक्षिणा

मैत्रावरुणीमामिक्षां वशा दक्षिणा

बार्हस्पत्यं चरुꣳ शितिपृष्ठो दक्षिणा।

आदित्यां मल्हां गर्भिणीमा लभते

मारुतीं पृश्निं पष्ठौहीम्

अश्विभ्यां पूष्णे पुरोडाशं द्वादशकपालं निर्वपति सरस्वते सत्यवाचे चरुꣳ सवित्रे सत्यप्रसवाय पुरोडाशं

द्वादशकपालम्।

तिसृधन्वꣳ शुष्कदृतिर्दक्षिणा॥

[[1-8-20]]

प्रयुजां हवीꣳषि॥ विश्वेदेवा ऋषयः

[[1-8-20-1]]

आग्नेयमष्टाकपालं निर्वपति

सौम्यं चरुꣳ।

सावित्रं द्वादशकपालम्

बार्हस्पत्यं चरुम्।

त्वाष्ट्रमष्टाकपालम्।

वैश्वानरं द्वादशकपालम्।

दक्षिणो रथवाहनवाहो दक्षिणा

सारस्व॒तं च॒रुं निर्व॑पति

पौ॒ष्णं च॒रुम्

मै॒त्रं च॒रुम्।

वा॒रु॒णं च॒रुम्।

क्षै॒त्र॒प॒त्यं च॒रुम्

आ॒दि॒त्यं च॒रुम्

उत्त॑रो रथवाहनवा॒हो दक्षि॑णा॥
[[1-8-21]]

सौत्रामणी॥ विश्वेदेवा ऋषयः
[[1-8-21-1]]

स्वा॒द्वीं त्वा᳚ स्वा॒दुना॑ ती॒व्रां ती॒व्रेणा॒मृता॑म॒मृते॑न सृ॒जामि॒ सꣳ सोमे॑न॒ सोमो᳚ऽस्य॒श्विभ्यां᳚ पच्यस्व॒ सर॑स्वत्यै पच्य॒स्वेन्द्रा॑य सु॒त्राम्णे॑ पच्यस्व

पु॒नातु॑ ते परि॒स्रुत॒ꣳ सोम॒ꣳ सूर्य॑स्य दु॒हि॒ता। वारे॑ण॒ शश्व॑ता॒ तना᳚॥

वा॒युः पू॒तः प॒वित्रे॑ण प्र॒त्यङ्क्सोमो॒ अति॑द्रुतः। इन्द्र॑स्य॒ युज्यः॒ सखा᳚॥

कु॒विद॒ङ्ग यव॑मन्तो॒ यवं॑ चि॒द्यथा॒ दान्त्य॑नुपू॒र्वं वि॒यूय॑।

इ॒हेहै॑षां कृणुत॒ भोज॑नानि॒ ये ब॒र्हिषो॒ नमो॑वृक्तिं॒ न ज॒ग्मुः॥

आ॒श्विनं॑ धू॒म्रमा ल॑भते सारस्व॒तं मे॒षमै॒न्द्रमृ॑ष॒भम्

ऐ॒न्द्रमेका॑दशकपालं॒ निर्व॑पति सा॒वि॒त्रं द्वाद॑शकपालं वा॒रु॒णं द॒शक॑पाल॒ꣳ।

सोम॑प्रतीकाः पितरस्तृण्णु॒त

वड॑बा॒ दक्षि॑णा॥
[[1-8-22]]

काम्ययाज्यापुरोऽनुवाक्याः॥ विश्वेदेवा ऋषयः
[[1-8-22-1]]

अग्ना॑विष्णू॒ महि॒ तद्वां᳚ महि॒त्वं वी॒तं घृ॒तस्य॒ गुह्या॑नि॒ नाम॑।

दमे॑दमे स॒प्त रत्ना॒ दधा॑ना॒ प्रति॑ वां जि॒ह्वा घृ॒तमा च॑रण्येत्॥

अग्ना॑विष्णू॒ महि॒ धाम॑ प्रि॒यं वां᳚ वी॒थो घृ॒तस्य॒ गुह्या॑ जु॒षा॒णा।

दमे॑दमे सुष्टु॒तीर्वा॑वृधा॒ना प्रति॑ वां जि॒ह्वा घृ॒तमुच्च॑रण्येत्॥

प्र णो॑ दे॒वी सर॑स्वती॒ वाजे॑भिर्वा॒जिनी॑वती। धी॒नाम॑वि॒त्र्य॑वतु॥

आ नो॑ दि॒वो बृ॒ह॒तः॥
[[1-8-22-2]]

पर्व॑ता॒दा सर॑स्वती यज॒ता ग॑न्तु य॒ज्ञम्।

हवं॑ दे॒वी जु॑जुषा॒णा घृ॒ताची॑ श॒ग्मां नो॒ वाच॑मुश॒ती शृ॑णोतु॥

बृह॒स्पते जु॒षस्व॑ नो ह॒व्यानि॑ विश्वदेव्य। रास्व॒ रत्ना॑नि दा॒शुषे॑॥

ए॒वा पि॒त्रे वि॒श्वदे॑वा॒य वृष्णे॑ य॒ज्ञैर्वि॑धेम॒ नम॑सा ह॒विर्भिः॑।

बृह॒स्पते सु॒प्रजा वी॒रव॑न्तो व॒यꣳ स्या॑म॒ पत॑यो रयी॒णाम्॥

बृह॒स्पते॒ अति॒ यद॒र्यो अर्हा॑द्द्यु॒मद्वि॒भाति॒ क्रतु॒म॒ज्जने॑षु।

यद्दी॒दय॒च्छव॑सा॥

[[1-8-22-3]]

ऋ॒त॒प्र॒जा॒त॒ तद॒स्मासु॒ द्रवि॑णं धेहि चि॒त्रम्॥

आ नो॑ मि॒त्रावरुणा घृ॒तैर्गव्यू॑तिमुक्षतम्। मध्वा॒ रजा॑ꣳसि सुक्रतू॥

प्र बा॒हवा॑ सिसृतं जी॒वसे॑ न॒ आ नो॒ गव्यू॑तिमुक्षतं घृ॒तेन॑।

आ नो॒ जने॑ श्रवयतं युवाना श्रु॒तं मे॑ मित्रावरुणा॒ ह॒वेमा॥

अ॒ग्निं वः॑ पू॒र्व्यं गि॒रा दे॒वमी॑डे॒ वसू॑नाम्।

स॒प॒र्यन्तः॑ पुरुप्रि॒यं मि॒त्रं न क्षे॑त्र॒साध॑सम्॥

म॒क्षू दे॒वव॑तो॒ रथः॥

[[1-8-22-4]]

शूरो॑ वा पृ॒त्सु कासु॑ चित्।

दे॒वाना॒ं य इन्मनो॒ यज॑मान॒ इय॑क्षत्य॒भीदय॑ज्वनो भुवत्॥

न यज॑मान रिष्यसि॒ न सु॑न्वान॒ न दे॑वयो।

अस॒दत्र॑ सु॒वीर्य॑मुत त्यदा॒श्वश्वि॑यम्।

न॒किष्टं॒ कर्म॑णा नश॒न्न प्र यो॑ष॒न्न यो॑षति॥

उप॑ क्षरन्ति॒ सिन्ध॑वो मयो॒भुव॑ ईजा॒नं च॑ य॒क्ष्यमा॑णं च धे॒नवः॑।

पृ॒णन्तं॑ च॒ पपु॑रिं च॥

[[1-8-22-5]]

श्र॒व॒स्यवो॑ घृ॒तस्य॒ धारा॒ उप॑ यन्ति वि॒श्वतः॑॥

सोमा॑रुद्रा॒ वि वृ॑ह॒तं विषू॑ची॒ममी॑वा॒ या नो॒ गय॑मावि॒वेश॑।

आ॒रे बा॑धेथा॒ं निर्ऋ॑तिं परा॒चैः कृ॒तं चि॒देनः॒ प्र मु॑मुक्तम॒स्मत्॥

सोमा॑रुद्रा युव॒मेता॒न्यस्मे विश्वा॑ त॒नूषु॑ भेष॒जानि॑ धत्तम्।

अव॑ स्यतं मु॒ञ्चतं॒ यन्नो॒ अस्ति॑ त॒नूषु॑ ब॒द्धं कृ॒तमेनो॑ अ॒स्मत्॥

सोमा॑पूषणा॒ जन॑ना रयी॒णां जन॑ना दि॒वो जन॑ना पृथि॒व्याः।
जा॒तौ विश्व॑स्य॒ भुव॑नस्य गो॒पौ दे॒वा अ॑कृण्वन्नमृत॑स्य॒ नाभि॑म्॥
इ॒मौ दे॒वौ जाय॑मानौ जुषन्ते॒मौ तमा॑ꣳसि गूहता॒मजु॑ष्टा।
आ॒भ्यामिन्द्रः॑ प॒क्वमा॒मास्व॒न्तः सोमापु॒षभ्यां॑ जनदु॒स्त्रिया॑सु॥

॥इति प्रथमकाण्डे अष्टमः प्रपाठकः समाप्तः॥

॥ इति प्रथमः काण्डः समाप्तः॥